# tattvamImAMsA

# તત્વમીમાંસા

## Document Information

Text title : tattvamImAMsA

File name : tattvamImAMsA.itx

Category : major_works

Location : doc_z_misc_major_works

Transliterated by : Dhaval Patel drdhaval2785 at gmail.com

Proofread by : Dhaval Patel drdhaval2785 at gmail.com

Source : sAnkhyasaNgrahaH 1918

Latest update : September 15, 2014

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

# તત્ત્વમીમાંસા

સુખૈકવિષયા ભૂતાનાં પ્રવૃત્તિઃ । સુખં ચ સતિ
દુઃખહેતાવસમ્ભવતિ । અતો ભવતિ દુઃખાભિઘાતકે જિજ્ઞાસા સા
ચ તત્ત્વજ્ઞાનાત્ । અતસ્તત્ત્વમત્ર નિરૂપ્યતે । નનુ ત્રિવિધં દુઃખમ્
આધ્યાત્મિકમાધિદૈવિકમાધિભૌતિકં ચ । તત્રાધ્યાત્મિકં દ્વિવિધં શારીરં
માનસઞ્ચ । શારીરં વાતપિત્તશ્લેષ્મણાં વૈષમ્યનિમિત્તં માનસં
કામક્રોધાદિનિબન્ધનમ્ । આધિભૌતિકં માનુષપશુપક્ષ્યાદિનિમિત્તમ્ ।
આધિદૈવિકં યક્ષરાક્ષસગ્રહાદ્યાવેશનિબન્ધનમ્ । તેષાં ચૈષાં
લૌકિકૈરેવોપાયૈઃ પ્રતીકારઃ શક્યતે । તથા હિ શારીરસ્યૌષધાદિભિઃ
માનસસ્ય મનોજ્ઞસ્ત્રીપાનભોજનવસ્ત્રાલઙ્કારાદિપ્રાપ્ત્યા આધિભૌતિકસ્ય
નીતિશાસ્ત્રાભ્યાસસુસ્થાનોપવેશાદિના આધિદૈવિકસ્ય મણિમન્ત્રાદ્યુપયોગેનેતિ
સુકર ઉપાયઃ તત્ત્વજ્ઞાનં ત્વનેકજન્મપરાભ્યાસસાધ્યમ્ । તથા ચ
લૌકિકાનામાભાણકઃ ।
અક્કે ચેન્મધુ વિન્દેત કિમર્થં પર્વતં વ્રજેત્ ।
ઇષ્ટસ્યાર્થસ્ય સમ્પ્રાપ્તૌ કો વિદ્વાન્ યત્નમાચરેત્ ॥ ઇતિ ।
અક્કે ગૃહકોણે । મૈવમ્ । ન હ્યેતૈરુપાયૈઃ સર્વમેવ દુઃખં
નિવર્તતે । નિવૃત્તં પુનર્નોત્પદ્યતે । યદ્યપિ શાસ્ત્રીયમપિ
અહોરાત્રમાસવર્ષાદિસાધ્યમુપાયાન્તરં સુકરં શ્રૂયતે અપામ
સોમમમૃતા અભૂમેતિ તથાપિ એતદપિ લૌકિકોપાયતુલ્યમેવ । તથાહિ
સોમયાગઃ પશુવધાદિસાધનત્વાન્ન વિશેષતઃ શુદ્ધઃ । અકૃતે
હિ તદ્વધપ્રાયશ્ચિત્તે સ્વર્ગાદિગત્યનન્તરં પરિપચ્યતે એવ
તદ્દુઃખમ્ । ન ચ ન હિંસ્યાત્સર્વાભૂતાનીતિ સામાન્યશાસ્ત્રભ્ય
વિશેષશાસ્ત્રેણાગ્નીષોમીયં પશુમાલભેતેત્યનેન બાધઃ શઙ્ક્યઃ
ભિન્નવિષયત્વેન બાધ્યબાધકભાવાસમ્ભવાત્ અગ્નીષોમીયં પશુમાલભેતેતિ
વાક્યેન હિ વધસ્ય ક્રતૂપકારકત્વમેવ બોધ્યતે ન તુ પુરુષપ્રત્યવાયાભાવઃ ।
એવં સ્વર્ગાદેરનિત્યત્વમપિ સત્ત્વે સતિ કાર્યત્વાદનુમીયતે । તથા ચ

શ્રુતિરપિ
ન કર્મણા ન પ્રજયા ધનેન
ત્યાગેનૈકેનામૃતત્વમાનશુઃ ।
પરેણ નાકં નિહિતં ગુહાયાં
વિભ્રાજતે યદ્યતયો વિશન્તિ ॥

કર્મણા જ્યોતિષ્ટોમાદિના પ્રજયા પુત્રેણ ધનેન દેવતાજ્ઞાનેન
પુત્રેણાયં લોકો જેયો વિદ્યયા દેવલોકઃ કર્મણા પિતૃલોક ઇતિ
શ્રુત્યન્તરાત્ એભિઃ પિત્રાદિલોકસ્યૈવ પ્રાપ્તિર્નામૃતત્વસ્યેતિ
ભાવહ । તર્હિ કથમમૃતત્વમિત્યત આહ ત્યાગેનેતિ ।
સર્વકર્મસંન્યાસસાધ્યજ્ઞાનેનેત્યર્થઃ । તદમૃતત્વં સ્વર્ગ એવ
ચેત્તત્રાહ પરેણ નાકમિતિ । તર્હિ દૂરસ્થત્વાન્ન પ્રાપ્યમિતિ ચેત્તત્રાહ
નિહિતં ગુહાયામિતિ । તચ્ચાસન્નત્વાત્પૃથક્ જનૈરપિ લભ્યમિતિ ચેત્તત્રાહ
યદ્યતય ઇતિ । અદૂરભૂતમપ્યવિવેકિનાં દૂરભૂતમેવ । તથા શ્રુત્યન્તરમ્ ।
કર્મણા મૃત્યુમૃષયો નિષેદુઃ
પ્રજાવન્તો દ્રવિણમીહમાનાઃ ।
તથાऽપરે ઋષયો યે મનીષિણઃ
પરં કર્મભ્યોऽમૃતત્વમાનશુરિતિ ॥

અપામ સોમમમૃતા અભૂમેત્યમૃતત્વાભિધાનં તુ ચિરસ્થિત્યભિપ્રાયમ્ ।
યદાહુઃ આભૂતસમ્પ્લવં સ્થાનમમૃતત્વં હિ ભાષ્યતે ઇતિ ।
તદેતત્સર્વમભિપ્રેત્યોક્તં શાસ્ત્રકૃદ્ભિઃ તદ્વિપરીતઃ શ્રેયાન્
વ્યક્તાવ્યક્તજ્ઞવિજ્ઞાનાત્ । અસ્યાર્થઃ । તસ્માત્સોમપાનાદેરવિશુદ્ધાદનિત્યાત્
વિપરીતો હિંસાદ્યસઙ્કુરાદ્વિશુદ્ધ ઉપાયઃ શ્રેયાન્ । સ ચ કથમ્
? વ્યક્તસ્ય કાર્યજાતસ્ય તત્કારણસ્ય અવ્યક્તસ્ય પ્રધાનસ્ય તાભ્યાં પરસ્ય
તસ્યાત્મનશ્ચ વિવેકેન જ્ઞાનાદ્ભવતિ ઇતિ । ન ચ વિવેકોત્પન્નફલસ્યાપિ
કાર્યત્વાદનિત્યત્વં શંક્યમ્ । ભાવરૂપકાર્યસ્યૈવાનિત્યત્વાત્ દુઃખધ્વંસસ્ય
તુ કાર્યત્વેऽપિ નિત્યત્વાત્ ।
અથાત્ર શાસ્ત્રે ચતસ્રો વિધાઃ । પ્રકૃતિર્વિકૃતિરુભયમનુભયઞ્ચેતિ ।
તત્ર જગતો મૂલકારણભૂતં પ્રધાનં ન વિકારઃ કિન્તુ પ્રકૃતિરેવ
પ્રકરોતીતિ પ્રકૃતિઃ સત્ત્વરજસ્તમસાં સામ્યાવસ્થા । અસ્યાશ્ચ
મૂલાન્તરમનવસ્થાભયાન્નાસ્તીતિ મૂલપ્રકૃતિરિત્યુચ્યતે । સૈવ શાસ્ત્રાન્તરે
અવિદ્યા માયાશબ્દેનોચ્યતે । એતદેવાવ્યક્તં સત્ત્વાદીનાં ગુણાનાં વૈષમ્યે

સતિ વ્યક્તમિત્યુચ્યતે । યથાહિ સમુદ્રજલે ચલિતાચલિતપ્રદેશાઃ ।
એવં ત્રિગુણાત્મિકે પ્રધાને પરિણામવાંસ્તદ્વિધુરશ્ચ પ્રદેશઃ । તત્ર
પ્રકૃતિવિકારેષુ મધ્યે આદ્યો વિકારો મહાનિત્યુચ્યતે સ એતદ્બુદ્ધિલક્ષણઃ ।
સ આહ મહાન્સાત્ત્વિકો રાજસસ્તામસશ્ચેતિ ત્રિવિધઃ । બુદ્ધેસ્તુ પ્રથમો
વિકારોઽહઙ્કારઃ । એતે ચ મહદાદયઃ પ્રકૃતયો વિકૃતયશ્ચ ।
તથાહિ મહત્તત્ત્વમહઙ્કારસ્ય પ્રકૃતિર્વિકૃતિશ્ચ મૂલપ્રકૃતેઃ ।
અયં હિ ક્રમઃ પ્રકૃતેર્મહાન્ મહતોઽહઙ્કારં અહઙ્કારાત્પઞ્ચ
તન્માત્રાઃ તાભ્યઃ પઞ્ચ ભૂતાનિ તન્માત્રાણિ પુનઃ ક્ષીરદધ્યોરન્તરાલે
કલલપરિણામાત્પરિણતાનિ સૂક્ષ્મભૂતાનિ કુસુમસૌરભ્યેન
સૂક્ષ્મસ્થૂલતયોપલક્ષ્યમાણં ગુણવૈષમ્યમેવ તન્માત્રશબ્દેન
ભૂતશબ્દેન ચોચ્યતે । પઞ્ચ ભૂતાનિ એકાદશેન્દ્રિયાણિ ચેતિ એષ
ષોડશકો ગણસ્તુ વિકાર એવ ન પ્રકૃતિઃ । પુરુષસ્ત્વાત્મા ન પ્રકૃતિર્ન
વિકૃતિઃ । તદેતદાહુઃ ।
મૂલપ્રકૃતિરવિકૃતિર્મહદાદ્યાઃ પ્રકૃતિવિકૃતયઃ સપ્ત ।
ષોડશકસ્તુ વિકારો ન પ્રકૃતિર્ન વિકૃતિઃ પુરુષઃ ॥ ઇતિ ।
અથ શાસ્ત્રપરિભાષા । દૃષ્ટમનુમાનમાપ્તવચનઞ્ચેતિ ત્રિવિધં
લૌકિકં પ્રમાણમ્ । આર્ષં તુ વિજ્ઞાનં યોગિનામેવેતિ તદત્ર નોક્તમ્ । તત્ર
પૃથિવ્યાદયઃ સુખાદયશ્ચાસ્મદાદીનાં વિષયાઃ । તન્માત્રલક્ષણાસ્તુ દેવાનાં
યોગિનાં ચ વિષયા ન ત્વસ્મદાદીનામ્ તેષાં ચેન્દ્રિયૈઃ સમ્બન્ધઃ સન્નિકર્ષઃ ।
એવઞ્ચ વિષયસમ્બદ્ધેન્દ્રિયાશ્રિતો યો બુદ્ધિધર્મોઽધ્યવસાયઃ સ
એવ પ્રમાણમ્ । અયં હિ ક્રમઃ । વિષયસમ્બદ્ધાનામિન્દ્રિયાણાં વૃત્તૌ
સત્યાં બુદ્ધેસ્તુ તમોભિભવે સતિ યઃ સત્ત્વસમુદ્રેકઃ સોઽધ્યવસાય ઇતિ
જ્ઞાનમિતિ વૃત્તિશ્ચાખ્યાયતે । તદિદં પ્રત્યક્ષપ્રમાણમ્ । અસ્માચ્ચ
યશ્ચેતનાશક્તેરનુગ્રહસ્તત્ફલં પ્રમા બોધઃ । બુદ્ધિસત્ત્વં હિ
પ્રાકૃતત્વાદચેતનમિતિ તદીયોઽધ્યવસાયોઽપ્યચેતનઃ ઘટાદિવત્ ।
એવં હિ બુદ્ધિસત્ત્વસ્ય પરિણામભેદાઃ સુખાદયોઽપ્યચેતનાઃ । પુરુષસ્તુ
સુખાદ્યનનુષઙ્ગી ચેતનઃ । સોઽયં બુદ્ધિતત્ત્વવર્ત્તિના જ્ઞાનસુખાદિના
તત્પ્રતિબિમ્બિતો બુદ્ધિસાદૃશ્યપ્રાપ્ત્યા જ્ઞાનસુખાદિમાનિવ ભવતિ
ચિતિસાદૃશ્યપ્રાપ્ત્યા ચ અચેતનાપિ બુદ્ધિસ્તદવધ્યવસાયશ્ચ ચેતન
ઇવ ભવતિ । ચાર્વાકાસ્તુ પ્રત્યક્ષાન્યત્ ન માનમિતિ વદન્તિ । તન્મતે
સંદિગ્ધવિપર્યયસ્તુ પુરુષબોધનં નોપપદ્યેત । નહિ પુરુષાન્તરગતઃ
સંશયઃ અનુમાનં કથનં વિના વા જ્ઞાતું શક્યઃ ।

પ્રમાણાન્તરાણિ ત્વત્રૈવાન્તર્ભવન્તિ । તથાહિ ઉપમાનં તાવત્
ગોસદૃશો ગવય ઇતિ વાક્યં તજ્જનિતો બોધો શબ્દ એવાન્તર્ભવતિ
ચક્ષુઃસંનિકૃષ્ટસ્ય ગવયસ્ય યત્ ગોસાદૃશ્યજ્ઞાનં તત્પ્રત્યક્ષમેવ ।
એવં જીવતશ્ચૈત્રસ્ય ગૃહાસત્ત્વેન બહિઃસત્ત્વકલ્પનમર્થાપત્તિઃ
સાપ્યનુમાન એવાન્તર્ભવતિ । વિમતશ્ચૈત્રો બહિર્ભવિતુમર્હતિ
ગૃહેષ્વવિદ્યમાનત્વાત્ । યદા ત્વવ્યાપકઃ સન્નેકત્રાસ્તિ તદાન્યત્ર નાસ્તિ
યદૈકત્ર નાસ્તિ તદાન્યત્રાસ્તીતિ વ્યાપ્તિગ્રહાત્ । એવમિહ વટે યક્ષઃ
પ્રતિવસતિ ઇતિ ઐતિહ્યં ન પ્રમાણમનિર્દિષ્ટસ્વવક્તૃકત્વેન સન્દેહાત્ ।
આપ્તોક્તત્વનિશ્ચયે ત્વાગમ એવ । એવમભાવો નાનુપલબ્ધિગમ્યઃ કિન્તુ
પ્રત્યક્ષ એવ । ન હિ ભૂતલસ્ય કૈવલ્યલક્ષણાત્પરિણામવિશેષાદન્યો
ઘટાભાવો નામ । સર્વ એવ હિ ભાવાઃ પ્રતિક્ષણં પરિણામિનઃ સ ચ
પરિણામભેદ ઐન્દ્રિયક એવેત્યલમ્ ।
તત્ર સૂક્ષ્મસ્યાવ્યક્તસ્યાપ્રત્યક્ષત્વેઽપિ મહદાદિકાર્યેણ
તદનુમીયતે । તથાહિ સદેવ કાર્યં કારણવ્યાપારાત્પ્રાગપિ । અસતો
હિ સત્ત્વં દુષ્કરમ્ નહિ નીલં શિલ્પિસહસ્રેણાપિ પીતં શક્યં
કર્તુમ્ । કિન્તુ તિલેષુ પીડનેન તૈલસ્યેવ આવિર્ભાવમાત્રમુત્પત્તિઃ
તિરોભાવ એવ વિનાશઃ । કિઞ્ચાસમ્બદ્ધસ્યાપિ કાર્યસ્ય જન્યત્વે
સમ્બદ્ધત્વાવિશેષાત્સર્વં કાર્યં સર્વસ્માદ્ભવેદિતિ કાર્યસમ્બદ્ધસ્યૈવ
કારણસ્ય જનકત્વમુપેયમ્ । ન ચ સદસતોઃ સમ્બન્ધોઽસ્તીતિ સત્કાર્યમ્ ।
કિઞ્ચ તન્તુધર્મત્વાત્તન્તૂપાદેયત્વાચ્ચ ન પટસ્યાર્થાન્તરત્વમ્
યન્નૈવં તન્નૈવં યથા ઘટપટૌ । તથા અર્થાન્તરયોઃ સંયોગો વા
ભવતિ યથા કુંડબદરયોઃ અપ્રાપ્તિર્વા ભવતિ હિમવદ્વિન્ધ્યયોઃ ।
તસ્માદ્યથા કૂર્મશરીરે કૂર્માઙ્ગાનિ નિવિશમાનાનિ તિરોભવન્તિ ન તત્ર
તાન્યુત્પદ્યન્તે ન વિનશ્યન્તિ વા એવમેકસ્માત્સુવર્ણાદેર્મુકુટાદિપ્રાદુર્ભાવ
એવોત્પત્તિઃ । એવઞ્ચ મહદાદિકાર્યં પ્રધાનેઽભિનિવિશતે અવ્યક્તં
ભવતિ ઇતિ । કારણે સત્ત્યેવ કાર્યસ્ય વિભાગાવિભાગાભ્યામવ્યક્તં
કારણમસ્તીતિ ગમ્યતે । તચ્ચાવ્યક્તં નિત્યં વ્યાપકં ચ સર્વં કાર્યં
વ્યાપ્નોતિ તથા નિઃક્રિયં ક્વચિદપ્યનાશ્રિતઞ્ચ એવં નિરવયવં
સ્વતન્ત્રં ચ । એતદ્વિપરીતન્તુ વ્યક્તમ્ । એવં વ્યક્તમવ્યક્તં ચ
સુખદુઃખમોહરૂપગુણત્રયાન્વિતમચેતનં પ્રસવધર્મિ ચ તદ્વિપરીતઃ
પુરુષઃ સુખાદયશ્ચ ગુણાઃ સત્ત્વરજસ્તમોરૂપાઃ । સત્ત્વસ્ય પ્રયોજનં
તુ પ્રકાશઃ રજસ્તુ તસ્ય પ્રવર્તકં તમસ્તુ નિયામકં યદિ હિ તમસા

ગુરુણા નિયમ્યેત તદા રજઃ લઘુ સત્ત્વં સર્વત્ર પ્રવર્ત્તયેત્ । યથા
સત્ત્વં રજસ્તમસી અભિભૂય શાન્તા વૃત્તિમધિગચ્છતિ યથા ચ રજઃ
સત્ત્વરજસી અભિભૂય ઘોરાં તથા તમઃ સત્ત્વરજસી અભિભૂય મૂઢામિતિ ।
યદ્યપ્યેતે પરસ્પરં વિરોધશીલાઃ તથાપિ યથા વાતપિત્તશ્લેષ્માણઃ
પરસ્પરવિરોધિનઃ શરીરધારણરૂપૈકકાર્યકારિણઃ એવમેતેऽપિ । એવં
સુખહેતુત્વાત્સત્ત્વં સુખાત્મકં દુઃખહેતુત્વાદ્દુઃખાત્મકં રજઃ યન્મોહકં
તત્તમઃ । તે ચ સુખદુઃખમોહાઃ પરસ્પરવિરોધિનઃ સ્વાનુરૂપાણ્યેવ
પરસ્પરં વિરુદ્ધાનિ સુખદુઃખમોહાત્મકાનિ નિમિત્તાનિ કલ્પયન્તિ । તથાહિ
એકૈવ સ્ત્રી સ્વામિનં પ્રતિ સુખરૂપસદ્ભાવાત્તં સુખાકરોતિ સપત્નીસ્તુ
દુઃખાકરોતિ એવમત્રાપ્યેકસ્યાપિ નિમિત્તભેદાદ્ભેદઃ । સુખપ્રકાશલાઘવૈસ્તુ
પરસ્પરમવિરોધાન્ન નિમિત્તભેદાઃ કલ્પ્યન્તે । સર્ગાદૌ તુ પરિણામસ્વભાવા
ગુણાઃ ક્ષણમપ્યપરિણમય્ય ન તિષ્ઠન્તીતિ સત્ત્વં સત્ત્વરૂપતયા રજો
રજોરૂપતયા તમસ્તમોરૂપતયા પ્રવર્ત્તતે । યથાહિ ઘનવિમુક્તજલાનાં
જમ્બીરકરવીરનારિકેરાદ્યાશ્રયભેદાદસ્તિ ભેદઃ એવમેકરૂપાણામપિ ગુણાનાં
પ્રતિગુણાશ્રયવિશેષાદનેકરૂપતા । આત્મા તુ વ્યક્તાવ્યક્તસંઘાતભિન્નઃ ।
પરાર્થો હિ સંઘાતો ભવતિ । યથા શયનાસનાદયઃ સંઘાતાઃ
શરીરાર્થા દૃષ્ટાઃ । કિઞ્ચ યથા રથાદિ યંત્ર્યાદિનાધિષ્ઠિતં
એવં ત્રિગુણાત્મકમપિ પરેણ કેનચિદધિષ્ઠીયમાનં યુક્તમ્ । સ ચાત્મા
પ્રતિશરીરં ભિન્નઃ ન હ્યેકસ્મિન્ સુખિનિ સર્વે સુખિનઃ । સ ચાયં પુરુષઃ
સાક્ષી ચ ભવતિ પ્રકૃતિર્હિ સ્વવિષયચરિતં પુરુષાય પ્રદર્શયતિ ।
તથાહિ લોકે અર્થિપ્રત્યર્થિનૌ વિવાદવિષયં સાક્ષિણે દર્શયતઃ । એવં
ચાયં દ્રષ્ટાપિ ભવતિ । તથા અત્રૈગુણાદસ્ય કૈવલ્યં ચ ધર્મઃ ।
આત્યન્તિકો હિ દુઃખત્રયાભાવઃ કૈવલ્યમ્ । અત એવાત્રિગુણત્વાન્મધ્યસ્થોऽપિ
ભવતિ સુખી હિ સુખે તૃપ્યન્ દુઃખી દ્વિષન્ મધ્યસ્થો ન ભવતિ ।
આત એવોભયરાહિત્યાદુદાસીન ઇત્યુચ્યતે । એવમપ્રસવધર્મિતાદકર્તાऽપિ ।
યદ્યપિ ચેતનોऽહં કરોમીતિ કૃતિચૈતન્યયોરૈકાધિકરણ્યં પ્રતીયતે
તથાપિ પુરુષપ્રધાનાદિસમ્બન્ધાત્પુરુષચૈતન્યમવ્યક્તે ગુણકર્તૃત્વં
ચ પુરુષે ઉપચર્યતે । ભોગ્યં હિ પ્રધાનં ભોક્તારમન્તરેણ ન
સંભવતિ ઇતિ ભવતિ તસ્ય ભોક્ત્રપેક્ષા પુરુષસ્તુ ભોગ્યેન પ્રધાનેન
સંયુક્તસ્તદ્ગતં દુઃખમાત્મન્યભિમન્યમાનઃ કૈવલ્યં પ્રાર્થયતે ।
તચ્ચ સત્ત્વપુરુષાન્યતાખ્યાતિનિબન્ધનમ્ ન ચ સત્ત્વપુરુષાન્યતાખ્યાતિઃ
પ્રધાનમન્તરેણેતિ કૈવલ્યાર્થં પુરુષઃ પ્રધાનમપેક્ષત ઇતિ તયોઃ

સંયોગઃ અત એવ સંયોગો ન મહદાદિસર્ગમન્તરેણ ભોગાય કૈવલ્યાય ચ પર્યાપ્ત ઇતિ સંયોગ એવ ભોગાપવર્ગાર્થં સર્ગં કરોતીતિ ॥

અથ વિવેકજ્ઞાનોપયોગિની બુદ્ધિર્નિરૂપ્યતે । તસ્યાશ્ચ વ્યાપારોઽધ્યવસાયઃ તદભિન્નઃ । એષ બુદ્ધેર્લક્ષણં સમાનાસમાનજાતીયવ્યવચ્છેદકત્વાત્ । તથાહિ સર્વોઽપિ  વ્યવહર્તાઽહમત્રાધિકૃત ઇતિ અભિમત્ય મયા એતત્કર્તવ્યમિતિ અધ્યવસ્યતિ તતશ્ચ પ્રવર્તતે । તત્ર ચિતિસન્નિધાનાદાપન્નચૈતન્યાયા બુદ્ધેર્યોઽયં કર્તવ્યમિતિ વિનિશયયઃ સોઽધ્યવસાયઃ । તત્ર ધર્મો યાગાદ્યનુષ્ઠાનજનિતઃ । જ્ઞાનં ગુણપુરુષાન્યતાખ્યાતિઃ । વૈરાગ્યં રાગાભાવઃ । એવમૈશ્વર્યમપિ બુદ્ધિધર્મો યતોઽણિમાદિપ્રાદુર્ભાવઃ । અહમત્ર શક્તઃ મત્તો નાન્યોઽત્રાધિકૃતઃ અતોઽહમસ્મિ ઇત્યાદિકો યોઽભિમાનઃ સોઽહઙ્કારવ્યાપારત્વાદહઙ્કારઃ । તમુપજીવ્ય હિ બુદ્ધિરધ્યવસ્યતિ કર્ત્તવ્યમેતન્મયેતિ અહઙ્કારાચ્ચ દ્વિવિધઃ સર્ગઃ સાત્ત્વિકાદેકાદશેન્દ્રિયાણિ તામસાત્તુ પઞ્ચતન્માત્રાઃ । રજસસ્તુ તત્પ્રવર્તકત્વમાત્રાત્કારણત્વમ્ । સાત્ત્વિકરાજસતામસાહઙ્કારાણામેવ ક્રમેણ વૈકારિકસ્તૈજસો ભૂતાદિરિતિ સંજ્ઞાઃ । ચક્ષુઃશ્રોત્રઘ્રાણરસનત્વગાખ્યાનિ બુદ્ધીન્દ્રિયાણિ । વાક્પાણિપાદપાયૂપસ્થાનિ કર્મેન્દ્રિયાણિ । મન ઉભયાત્મકં બુદ્ધીન્દ્રિયં કર્મેન્દ્રિયઞ્ચ । ચક્ષુરાદીનાં ચ મનોધિષ્ઠિતાનાં સ્વવિષયેષુ પ્રવૃત્તેઃ । પ્રથમં વસ્તુદર્શનન્તન્તરં બાલમૂકાદિવન્નિર્વિકલ્પાત્મકં સામાન્યતો જ્ઞાનમુત્પદ્યતે । પશ્ચાચ્ચ વસ્તુધર્મૈર્જાત્યાદિભિર્યોઽધ્યવસાયઃ સ સઙ્કલ્પાખ્યો મનસો વ્યાપારઃ । એકસ્માદહઙ્કારાદેકાદશવિધાનિ ઇન્દ્રિયાણિ ભવન્તીત્યત્ર તુ શબ્દાદ્યુપભોગસમ્પ્રવર્તકાદૃષ્ટભેદ એવ નિયામકઃ । અદૃષ્ટભેદસ્તુ ગુણપરિણામ એવ । પઞ્ચબુદ્ધીન્દ્રિયાણાં સમ્બદ્ધવસ્ત્વાલોચનં વૃત્તિઃ વાગાદિકર્મેન્દ્રિયાણાં તુ વચનાદયો વૃત્તયઃ । એવં મહતોઽધ્યવસાયઃ અહઙ્કારસ્યાભિમાનઃ સઙ્કલ્પો મનસો વૃત્તિર્વ્યાપારઃ । કાર્યકરણાભિમુખાનાં કરણાનાં વૃત્તિસઙ્કરસ્તુ ન ભવતિ । યથાહિ પરાવસ્કન્દાય પ્રવૃત્તાઃ શાક્તીકયાષ્ટીકાદયઃ સ્વં સ્વં શક્ત્યાદિકમેવાદદતે ન પરસ્પરયષ્ટ્યાદિકમ્ । નનુ યાષ્ટીકાનાં ચેતનત્વાદસ્તુ તથા પ્રવૃત્તિઃ કરણાનાં ત્વચેતનાનાં પ્રવૃત્તેરયુક્તત્વાત્તત્સ્વરૂપસામર્થ્યોપભોગાભિજ્ઞ અધિષ્ઠાતા સ્વીકાર્ય ઇતિ ચેન્ન તત્પ્રવૃત્તૌ પુરુષાર્થસ્ય હેતુત્વાત્ એતચ્ચોપપાદયિષ્યતિ ।

કરણાનિ તુ ત્રયોદશ । કરણત્વં તુ શબ્દસ્પર્શાદિપ્રકાશનં
કર્મેન્દ્રિયાણાં તુ વચનાદિવ્યાપારઃ । એતદ્બાહ્યકરણં
વર્ત્તમાનકાલમન્તષ્કરણં તુ ત્રિકાલમ્ । નદીપૂરભેદાદભૂદ્વૃષ્ટિઃ
અસ્તિ ધૂમાદિહાગ્નિઃ પિપીલિકાણ્ડસંચરણાદ્ભવિષ્યતિ વૃષ્ટિરિતિ
પ્રત્યયાત્ । યે તુ વૈશેષિકાઃ કાલમેકમતિરિક્તં સ્વીકુર્વતે ।
તન્મતેઽપ્યતીતાનાગતાદિવ્યવહારભેદઃ ઉપાધિભેદાદેવ ભવતિ એવં ચ
તૈસ્તૈરુપાધિભિરેવાતીતાનાગતાદિભેદસિદ્ધૌ કિમતિરિક્તકાલસ્વીકારેણેતિ
સાંખ્યાઃ । એષાં ચેન્દ્રિયાણામ પ્રધાનાપ્રધાનભાવોઽપ્યસ્તિ । યથાહિ
ગ્રામાધ્યક્ષા કર્ષકાદિભ્યઃ કરમાદાય વિષયાધ્યક્ષાય પ્રયચ્છન્તિ
વિષયાધ્યક્ષશ્ચ સર્વાધ્યક્ષાય સ ચ ભૂપતયે એવં બાહ્યેન્દ્રિયાણ્યાલોચ્ય
મનસે સમર્પયન્તિ મનશ્ચ સઙ્કલ્પ્યાહઙ્કારાય અહઙ્કારશ્ચાભિમત્ય
બુદ્ધૌ સર્વાધ્યક્ષાયામિતિ । એતે ચ બુદ્ધીન્દ્રિયમનોહઙ્કારા
ગુણવિશેષા ગુણાનાં સત્ત્વરજસ્તમસાં વિકારાઃ પરસ્પરં વિરુદ્ધાં અપિ
પુરુષાર્થેનૈકવાક્યતાપન્નાઃ યથા સન્તમસાપનયનેન પ્રકાશાય મિલિતા
વર્તિતૈલવહ્નયઃ પ્રદીપો ભવતિ । નનુ કસ્માદ્બુદ્ધૌ પ્રયચ્છન્તિ
ન પુનરહઙ્કારાય મનસે વેતિ ચેન્ન પુરુષાર્થસ્ય પ્રયોજકતયા
સાક્ષાત્સાધનં પ્રધાનં બુદ્ધિરેવ અહઙ્કારાદયસ્તુ તં પ્રતિ ગૌણાઃ ।
અસ્મદાદિભિઃ પરસ્પરવ્યાવૃત્તાનિ નાનુભૂયન્તે ઇતિ શબ્દાદિતન્માત્રાણિ
અવિશેષાઃ સૂક્ષ્માણિ ચ । આકાશાદિષુ તુ સ્થૂલેષુ ક્વચિત્સત્ત્વપ્રધાનતયા
શાન્તાઃ સુખાઃ પ્રસન્ના લઘવઃ કેચિદ્રજસ્તમઃપ્રધાનતયા ઘોરા મૂઢાશ્ચ ।
તે વિશેષાઃ પુનઃ ત્રિધા સૂક્ષ્મં શરીરં માતાપિતૃજં મહાભૂતાનિ
ચ । પ્રધાનેનાદિસર્ગે પ્રતિપુરુષમેકૈકમુત્પાદિતં તથાઽવ્યાહતં
શિલામપ્યનુપ્રવિશતિ । સર્ગાદામહાપ્રલયમવતિષ્ઠતે સૂક્ષ્મં
શરીરં તચ્ચ મહદહઙ્કારૈકાદશેન્દ્રિયપઞ્ચતન્માત્રસમુદાયઃ ।
એતચ્ચ શરીરં ભોગાનર્હ ઇતિ સ્થૂલં શરીરં ષાટ્કૌશિકમાશ્રયતિ ।
લોમલોહિતમાંસાનિ માતૃતઃ સ્નાય્વસ્થિમજ્જાનઃ પિતૃત ઇતિ ષટ્ કોશાઃ ।
નનુ ધર્માધર્મનિમિત્તઃ સંસારઃ તસ્ય ચ સૂક્ષ્મશરીરેઽભાવાત્કથં
સ્થૂલશરીરાશ્રયણમિતિ ચેત્ ન ધર્માદ્યન્વિતબુદ્ધ્યા સંયોગેન
તસ્યાપિ ધર્માદ્યભિવાસિતત્વાત્ યથાહિ સુરભિપુષ્પાદિસમ્બન્ધાદ્વસ્ત્રમપિ
તદામોદવાસિતં ભવતિ । ધર્માધર્માદિનિમિત્તકં ચ સ્થૂલશરીરગ્રહણં
તયોઃ સંસર્ગેણ સૂક્ષ્મશરીરં સ્થૂલશરીરમાશ્રિત્ય દેવો વા મનુષ્યો
વા પશુર્વા ભવતિ । યથાહિ નટસ્તાં ભૂમિકામ વિધાય ધર્મરાજો

વા ભવતિ વત્સરાજો વા ભવતિ ઇતિ । હેતુસ્ત્વત્ર પુરુષાર્થ એવ ।
તત્રોર્ધ્વગમનસ્ય નિમિત્તં ધર્મઃ । એવમધર્મેણાધોગતિઃ ।
જ્ઞાનેન મોક્ષોઽજ્ઞાનેન બન્ધઃ । તત્ત્વાનભિજ્ઞસ્ય
પુરુષસ્ય વૈરાગ્યમાત્રાત્પ્રકૃત્યાદિષ્વાત્મબુધ્યોપાસ્યમાનેષુ
તત્રૈવ લયઃ રાગાત્સંસારઃ ઐશ્વર્યાદિચ્છાયા અવિઘાતઃ
વિઘાતશ્ચાનૈશ્વર્યાત્ । અયં બુદ્ધિસર્ગઃ ચતુર્ધા
વિપર્યયાશક્તિતુષ્ટિસિદ્ધિભેદાત્ । તત્ર વિપર્યયોઽજ્ઞાનમવિદ્યા ।
વિપર્યયઃ પઞ્ચધા અવિદ્યાસ્મિતારાગદ્વેષાભિનિવેશા
યથાસંખ્યં તમોમોહમહામોહતામિસ્રાન્ધતામિસ્રસંજ્ઞાભેદાત્ ।
પ્રકૃત્યાદિષ્વનાત્મસ્વાત્મબુદ્ધિરવિદ્યા તમઃ ।
દેવાદીનામણિદાદ્યૈશ્વર્યેષુ શાશ્વતિકત્વાભિમાનોઽસ્મિતા મોહઃ ।
શબ્દાદિષુ વિષયેષુ રાગ આસક્તિર્મહામોહઃ । દેવાદીનામસુરાદિભ્યઃ
સ્વૈશ્વર્યાણિમાભિઘાતભયમભિનિવેશોઽન્ધતામિસ્રઃ । અશક્તિસ્તુ
અન્ધત્વપઙ્ગુત્વાદિરૂપા કરણવૈકલ્યહેતુકા । તુષ્ટયો દ્વેધા આધ્યાત્મિકા
બાહ્યાશ્ચ પ્રકૃતિવ્યતિરિક્ત આત્માસ્તીતિ નિશ્ચિત્ય સંન્યાસાદેવ તવાપવર્ગો
ભવિષ્યતીતિ ઉપદેશાદૌ યા તુષ્ટયસ્તા આધ્યાત્મિક્યઃ પઞ્ચવિષયોપરમાત્
યા તુષ્ટયસ્તા બાહ્યાઃ । આત્મવિદ્યાનામધ્યયનમનનાદયઃ સિદ્ધિભેદાઃ ।
એવં નિરૂપિતો બુદ્ધિસર્ગઃ । તન્માત્રસર્ગોઽપિ
દેવમનુષ્યપશ્વાદિભેદાદ્બહુધા । તત્રોર્ધાધોમધ્યલોકાઃ
સત્ત્વરજોતમોબહુલાઃ । નનુ સુખદુઃખાદયઃ પ્રાકૃતા બુદ્ધિગુણાઃ
કથં ચેતને ભવન્તીતિ ચેત્સત્યમ્ પુરિ લિઙ્ગે શેરતે સ પુરુષઃ ।
એવં ચ લિઙ્ગપુરુષયોઃ સમ્બન્ધાલ્લિઙ્ગધર્માનાત્મન્યધ્યવસ્યતિ ।
અયં ચ મહદાદિ પૃથિવ્યાદિમહાભૂતાન્તઃ સર્ગઃ પ્રકૃત્યૈવ
કૃતઃ । નિષ્કારણત્વે તુ સદૈવ સ્યાન્નૈવ વા સ્યાત્ । ઈશ્વરસ્તુ
ન તત્રોપાદાનં ચિતિશક્તેરપરિણામાત્ । નાપિ ઈશ્વરાધિષ્ઠિતાયા
પ્રકૃતેઃ કર્તૃત્વં નિર્વ્યાપારસ્યાધિષ્ઠાતૃત્વાસમ્ભવાત્ । નહિ
નિર્વ્યાપારસ્તક્ષાવાસ્યાદ્યધિતિષ્ઠતિ । નનુ પ્રકૃતેઃ કર્તૃત્વે
તસ્યા નિત્યત્વેનાનુપરમાત્કદાપિ મોક્ષો ન સ્યાદિતિ ચેન્ન । યથા હિ
ઓદનકામઃ પક્વૌદનો ન પ્રવર્તતે પુનસ્તત્ર એવં યં યં પુરુષં
પ્રકૃતિર્મોચિતવતી ન તં પ્રતિ પુનઃ પ્રવર્તતે । નન્વચેતનાયાં
પ્રકૃતૌ કથં ચેતનધર્મઃ પ્રવૃત્તિઃ તસ્માદસ્તિ પ્રકૃતેરધિષ્ઠાતા
ચેતનઃ આત્માનસ્તુ પ્રકૃતિસ્વરૂપાનભિજ્ઞત્વાન્નાધિષ્ઠાતુમર્હન્તિ તસ્માદસ્તિ

સર્વાર્થદર્શી પ્રકૃતેરધિષ્ઠાતા સ ચેશ્વર એવેતિ ચેત્સત્યમ્ યથાહિ
વત્વવિવૃદ્ધ્યર્થમચેતનમપિ ક્ષીરં પ્રવર્તતે  તથા પ્રકૃતિરપિ
પુરુષમોક્ષાય પ્રવર્તિષ્યતે । ન ચેશ્વરાધિષ્ઠાનત્વેન ક્ષીરે
પ્રવૃત્તિઃ શઙ્કયા । દ્વિધા હિ પ્રવૃત્તિર્ભવતિ સ્વાર્થાય કારુણ્યાય
વા । ન ચાપ્તસકલકામસ્યેશ્વરસ્ય કિમપિ પ્રાર્થનીયમસ્તિ સર્ગાત્પ્રાક્
દુઃખાભાવેન કરુણાયા અસંભવાત્ । કિઞ્ચ કરુણયા પ્રેરિત ઈશ્વરઃ સુખિન
એવ સર્વાન્ પ્રાણિનઃ સૃજેત્ ન વિચિત્રાન્ । પ્રકૃતેસ્ત્વચેતનતયા નેદં
દ્વયં કિન્તુ પરાર્થૈવ પ્રવૃત્તિઃ યથા પારિષદાન્પ્રદર્શ્યન્નિવર્તતે
નટઃ એવં પ્રકૃતિઃ આત્માનં શબ્દાદ્યાત્મના પુરુષાદ્ભેદેન પ્રકાશ્ય
નિવર્તતે ।
ફલાભાવેઽપિ નિર્ગુણે ઉપકારિણ્યપિ પુરુષે પ્રકૃતિસ્તપસ્વિની
પ્રવર્તતે એવ યથાહિ ગુણવાનુપકાર્યપિ ભૃત્યો નિર્ગુણે ઉપકારિણ્યપિ
સ્વામિનિ નિષ્ફલારાધનઃ । યદ્યપિ નાટ્યાન્નિવૃત્તોઽપિ નટઃ કાલાન્તરે
પુનરપિ પ્રવર્તતે એવં મુક્તં પ્રતિ પ્રકૃતિસ્તુ ન પુનઃ પ્રવર્તતે
યથાહિ વિગલિતવસના કુલવધૂઃ કદાચિત્કેનચિદ્દૃષ્ટા ચેત્તદાસૌ
તથા યતતે યથા ન પુરુષાન્તરાણિ પશ્યન્તિ એવં પ્રકૃતિરપિ
વિવેકેન સાક્ષાત્કૃતાઽતિલજ્જાવશાત્પુનઃ સ્વાત્માનં ન પ્રદર્શયતિ ।
નનુ સવાસનક્લેશકર્માશયાનાં બન્ધનસંજ્ઞિતાનામપ્યપરિણામિનિ
પુરુષેઽસમ્ભવાત્કથં મોક્ષઃ મુચેર્બન્ધનવિશ્લેષાર્થત્વાત્ ।
અત એવ ન સંસારોઽપિ સમ્ભવતિ નિષ્ક્રિયત્વાત્ । મૈવમ્ ।
યથાહિ ભૃત્યગતૌ જયપરાજયૌ સ્વામિન્યુપચર્યેતે એવં
પ્રકૃતિગતયોરપિ ભોગાપવર્ગયોર્વિવેકાગ્રહાત્પુરુષે ઉપચારઃ ।
તત્ર ધર્માધર્માજ્ઞાનવૈરાગ્યાવૈરાગ્યૈશ્વર્યાનૈશ્વર્યરૂપૈઃ
સપ્તભિર્ભાવૈર્બધ્નાતિ તત્ત્વજ્ઞાનેન તુ મોચયતિ । એવં ચ
કૃતાદસ્માત્તત્ત્વાભ્યાસાન્નાસ્મિ ન મે નાહમિતિ શુદ્ધમુત્પદ્યતે જ્ઞાનં
યદ્વિષયો અભ્યાસસ્તં સાક્ષાત્કારયતીતિ । નાસ્મીત્યનેન ક્રિયામાત્રન્નિષિધ્યતે
અસ્તેઃ ક્રિયાર્થત્વાત્ । નાહમિત્યનેન કર્તૃત્વં ન મે ઇત્યનેન સ્વામિત્વં
નિષિધ્યતે । ભોગવિવેકસાક્ષાત્કારૌ પ્રકૃતેઃ પ્રસોતવ્યૌ તૌ ચ
પ્રસૂતાવિતિ નિવૃત્તા પ્રકૃતિસ્તાં નિષ્ક્રિયઃ સ્વચ્છપુરુષઃ પશ્યતિ
પ્રકૃતિપુરુષયોરસંસર્ગેઽપ્યવિવેકખ્યાતિનિબન્ધનઃ સંસારઃ પુનર્ન
ભવતિ ઇતિ । અન્તે તત્ત્વજ્ઞાનસ્ય તદાનીમેવ શરીરપાતસ્તુ ન ભવતિ ।
યથાહિ નિવૃત્તે કુલાલવ્યાપારે સંસ્કારવશાત્ ચક્રં ભ્રમત્તિષ્ઠતિ

એવં સંસ્કારવશાત્ શરીરમપિ શરીરપાતાનન્તરં તુ પ્રધાનસ્ય
નિવૃત્તત્વાદાત્યન્તિકમપિ દુઃખં નશ્યતિ દુઃખાભાવરૂપં કૈવલ્યમાપ્નોતિ ॥

ઇતિ શ્રીમદ્દેવીદત્તાત્મજગમસેવકસૂન્વાચાર્યકૃષ્ણમિત્રકૃતા તત્ત્વમીમાંસા
સમાપ્તા ॥

Encoded and proofread by Dhaval Patel drdhaval2785 at gmail.com

*tattvamImAMsA*

pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*